## ''ज्ञानाधारितसमाजनिर्माणे चतुर्दशविद्यानां योगदानम्।''

अशोककछवाहः

ज्ञानादेव नु कैवल्यम् इति श्रुतिवचनात् जानेनैव मुक्तिप्राप्तिरिती भारतीयसंस्कृते: सारभूतं तत्वम्। छात्राणां सर्वङ्गीणविकास एव आधुनिकशिक्षापद्धतिविशारदैरुद्घोष्यते। उभयो: अनयो: सङ्कलनेन शिक्षापद्धति: सार्थकतां धत्ते।

समाजस्य योगक्षेमाय सदा विद्या उपयुज्यते इति आधुनिकप्राचीनविद्याज़्यासविचरक्षणै: नितरां श्लाघते। अत्र सामाजिकाशिक्षाया: कार्यमस्ति यत् सा सर्वज्ञ्य:त इन्थं प्रशिक्षणव्यवस्था कुर्यात् येन जना: नागरिकरुपेण स्वराष्ट्रं प्रति स्वराज्यं प्रति व्यक्तिरुपेण समाजं प्रति कर्तव्यजानं कुर्यु:। एतादृशसमूहानां सङ्कलनादेव राष्ट्राभिवृद्धिरपि संभवाति इत्यत्र नास्ति संशय:।

प्राचीनभारते चतुर्दशविद्यानां सङ्कलनेन एका पद्धति: आविष्कृता वर्तते। सा च सर्वप्रसिद्धा भवति।

**अङ्गानि वेदश्चत्वारो**
**मीमांसा न्यायविस्तर:।**
**पुराणं धर्मशास्त्रञ्च**
**विद्या ह्येता चतुर्दश।।**

साङ्गोपाङ्गवेदाध्ययनमेव भारतीयसंस्कृते: मूलभूतो विषय:। तत्र च ऋग्यजु:सामाथर्वणात्मकं वेदवाङ्मयं, षडङ्गानि, पुराणं, धर्मशास्त्रं, मीमांसा, न्याय: एता: भवन्ति चतुर्दश विधा:।

वेदाङ्गानितु षट् भवन्ति। तानि च ज्योतिषं, कलपो, निरुक्तं, शिक्षा, व्याकरणं, छन्द: इति। एतेषां वेदाङ्गनां प्रत्येकं प्रत्येकं प्राधान्यं द्यतयितुं वेदपुरुषाङ्गत्वेन वर्ण्यते।

**''छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।''**

छन्दस्तु वेदपुरुषस्य पादौ भवति। कल्पस्तु हस्तौ इति वर्ण्यते। ज्योतिषन्तु नेत्रत्वेन निरुक्तन्तु श्रोत्रत्वेन च व्यवहियते। शिक्षा तु वेदपुरुषस्य घ्राणं भवति मुखन्तु व्याकरणशास्त्रं भवति। आङ्गै: सार्धं वेदाध्ययनमेव ब्रह्मलोकप्राप्तिसोपानम्।

ज्योतिश्शास्त्रे तु सिद्धान्तज्योतिषं फलज्योतिषञ्च अन्तर्भवति। कल्पशास्त्रन्तु चतुर्धा भवति। 1. श्रौतसूत्रम् 2. गृह्यसूत्रम् 3. धर्मसूत्रम् 4. शुल्बसूत्रम् च। एषु श्रोतसूत्रन्तु श्रुतिविहिनविषयाणां प्रतिपादनं क्रियते। गृह्यसूत्रन्तु षोडशाचारान्वित गार्हस्थ्यजीवनस्य चर्याप्रतिपादनं करोति। धर्मसूत्रन्तु नीतिविषयप्रतिपादात्मकं वर्तते। शुल्बसूत्रेषु यज्ञवेद्यादि निर्माणपद्धति: प्रतिपादिता।

''शिक्षन्ते वेदनायोपदिश्यन्ते स्वरवर्णादयो यत्रासौ शिक्षा इत्येव सायणाचार्येण शिक्षा पदस्यार्थः व्याज़्यातः। स्वराणाम् उच्चारणं, स्थानानि, प्रयत्नम् इत्यादीनाम् अनुशासनमेव शिक्षा। सन्धिः, उच्चारणं, वर्णाः, उदात्तादि स्वराः इत्यादिनां प्रतिपादकविज्ञानशाखा एव शिक्षा इति तैत्तिरीयारण्यके उल्लिखितम्। अर्थत् वेदमन्त्रोच्चारणस्य अशुद्धिव्यावर्तनपुरःसरं शुद्धोच्चारणसिद्धये या उपयुज्यते सा एव शिक्षा।

''व्याक्रियन्ते प्रतिपाद्यन्ते असाधुशब्देज़्यः साधुशब्दाः येन ददेव व्याकरणम्।'' व्याकरणन्तु वेदपुरुषस्य मुखत्वेन व्यज़्यातम्। एकस्यां मालायां विद्यमानरत्नानां सर्वेषां तुल्यप्राधान्यं वर्तते तथापि केन्द्ररत्नस्यैकस्य अधिक प्राधान्यमिव भारते प्राक् विद्यमानेषु व्याकरणग्रन्थेषु पाणिनीयव्याकरणमेव सर्वाकर्षणीयतां धत्ते।

एवञ्च वेदाङ्गेषु अन्यतमं भवति निरुक्तम्। पदानां निरुक्तिप्रतिपादनशास्त्रं भवति निरुक्तम्। यास्केनैव निरुक्तग्रन्थो रचितः।

वर्णविन्यासकौतुकं छन्दशास्त्रद्वारा प्रतिपादयति। गायत्री, त्रिष्टुप् इत्यादीनि छन्दांसि वैदिकवाङ्मयेषु सुप्रसिद्धानि वर्तन्ते। शास्त्रस्यास्य परामर्शः यद्यापि ब्राह्मणादिषु द्रष्टुं शज़्यते तथापि पिङ्गलाचार्येण कृतं छन्दसूत्रमेव शास्त्रस्यास्य प्रामाणिकग्रन्थ इति आमनन्ति पण्डिताः।

मातुम् इच्छा मीमांसा। यज्ञकर्मणां व्याज़्यानमेव शास्त्रेऽस्मिन् मुज़्यतया प्रतिपाद्यते। यज्ञविषयाणां ससूक्ष्मपतिपादनावसरे भाषातत्वोखनमापिअत्र द्रष्टुं शज़्यते। महर्षिणा जैमिनिना कृता द्वादशपदलक्षणिः एव अस्य मूलभूता कृतिरिति सर्वैरपि अङिगक्रियते। तत्पश्चात् भाट्टमतं प्राभाकरमतमिति गुरुशिष्याज़्यां मतद्धयत्वेन एषा शास्त्रशाखा वर्धिता।

नीयन्ते प्रतिपाद्यन्ते अनेन इति न्यायः। न्यायसूत्रस्य प्रवर्तको भवति गौतममुनिः। सर्वसिद्धान्तप्रमाणिकवत्करणार्थं न्यायशास्त्रेमेव उपयुज्यते।

ध्रियतेऽनेन इति धर्मः। धर्मप्रतिपादकं शास्त्रमेव धर्माशास्त्रम्। स्वगार्हिकजीवनाय सुसामाजिकजीवनाय अपि धर्मशास्त्रं नितराम् उपकुर्वते।

**''सृष्टिप्रवृत्ति संहारधर्ममोक्षप्रयोजनं**

**ब्रह्मभिर्विविधैः प्रोक्तं पुराणं पञ्जलक्षणम्।''**

अर्थशास्त्रे इत्थं पुराणलक्षणं प्रोक्तम्। प्रायेण अष्टादशपुराणानि तावदेव उपपुराणानि वर्तन्ते। सर्वेषामपि कर्तृत्वं व्यासऋषौ निक्षिप्तञ्च।

भारते एताः चतुर्दश विद्याः एव पाठ्यक्रमरूपेण स्वीकृता वर्तन्ते। तेन अध्येतृणां न केवलं व्यावहरिकविषयाणां अपि तु तद्भिन्नविषयाणामपि ज्ञानम् एधते। प्रायोगिकरीत्या चिन्तनमपि सुकरं भवति। अनया शिक्षापद्धत्या एव भारतीयसंस्कृतिः इतरसंस्कृतिज़्यः सर्वादरणीयताम् अनश्वरताञ्ज प्राप्य देदीप्यते।

अर्थशास्त्रेऽपि कौटिल्येन भारतीयशिक्षाविषये पाठ्यक्रमविषये च कथितं वर्तते। तत्र तु कौटिल्यः प्रधानतया विद्याः चतस्र एव इति कथ्यते। ताः तु आन्वीक्षिकी, त्रयी, वार्ता दण्डनीतिः च। कौटिल्यस्तु एताः एव विद्यारूपेण स्वीकृतः। ज्ञानाधारितसमाजाय मानवानां सुजीवनाय च एता एव पर्याप्ताः एव तेषां मतम्। एतासु एव सर्वे विषयाः अन्तर्भवन्ति।

आन्वीक्षिज़्यां सांज़्यं, योगः, लोकायतं चान्तर्भवन्ति। धर्मतत्वविचारः आन्वीक्षीज़्या साध्यते। सुखदुःखादि विरुद्ध–द्वन्देषु आन्वीक्षिकी मनःस्थैर्यं प्रददाति। सज़्पूर्णवैदिकवाङ्यमेव त्रयीशब्देन

अभिधीयते। यतो हि अथर्वणस्यापि तेषु अन्तर्भावं कौटिल्यमते वर्तते। एवञ्च साङ्गवेदं मिलित्वा दश, तैः साकं पुराणानि च संयुज्य एकादशविद्याः त्रयीसंज्ञायाम् अन्तर्भवन्ति।

कृषिवाणिज्यादि समस्तार्थानर्थचिन्ताप्रकारप्रपञ्चसारबोधिनी व्यवहारतत्वदर्शिनी वार्ता। समुचित सुस्थित जीवनाधारित समूहनिर्मिति हेतुभूतविद्या भवति दण्डनीतिः।

कौटिलीयग्रन्थेऽपि एतादृशविद्याप्रपञ्च प्रतिपादनदर्शनात् मौर्यसाम्राज्यकालेऽपि एतादृशशिक्षासम्प्रदायस्य, तद्वारा ज्ञानाधारित समाजस्य विकसनञ्च भारते राष्ट्रसंस्कृतिवर्धनपुरःसरं उल्लसति स्म। एतद्विद्याप्रपञ्च प्रसारितसंस्कृतिसारभूतमेव भारतीयनित्य नैमिनैमित्तिकजीवन पद्धतिरिति तज्ज्ञैः अवगन्तुं शक्यते।

देशराज्यराष्ट्रादिषु संस्कृत्यपचयहेतवस्तु काले काले सम्भवत्येव। वैदेशिक राष्ट्रनीतिसङ्कलनमपि तत्कारणमिति यद्यप्युक्तं तथापि स्वदेशराष्ट्रादिजन्यहेतवोऽपि संस्कृतिच्युतिकारणभूतेन न केवलं भारते अपि सर्वत्रापि वर्तत इति सामूहिकजीवनविज्ञानशाखाकोविदैः नितरां सिद्धान्तीक्रियते। उपर्युक्तविषयद्वारा ज्ञानाधारित समाजनिर्माणे भारतीयशिक्षायाः योगदानं चतुर्दशविद्यानां वर्ततेइत्यत्र नास्ति सन्देहः।

**''सृष्टिप्रवृत्ति संहारधर्ममोक्षप्रयोजनं**

**ब्रह्मभिर्विविधैः प्रोक्तं पुराणं पञ्जलक्षणम्।''**

अर्थशास्त्रे इत्थं पुराणलक्षणं प्रोक्तम्। प्रायेण अष्टादशपुराणानि तावदेव उपपुराणानि वर्तन्ते। सर्वेषामपि कर्तृत्वं व्यासऋषौ निक्षिप्तञ्च।

भारते एताः चतुर्दश विद्याः एव पाठ्यक्रमरूपेण स्वीकृता वर्तन्ते। तेन अध्येतृणां न केवलं व्यावहरिकविषयाणां अपि तु तद्भिन्नविषयाणामपि ज्ञानम् एधते। प्रायोगिकरीत्या चिन्तनमपि सुकरं भवति। अनया शिक्षापद्धत्या एव भारतीयसंस्कृतिः इतरसंस्कृतिज्यः सर्वादरणीयताम् अनश्वरताञ्ज प्राप्य देदीप्यते।

अर्थशास्त्रेऽपि कौटिल्येन भारतीयशिक्षाविषये पाठ्यक्रमविषये च कथितं वर्तते। तत्र तु कौटिल्यः प्रधानतया विद्याः चतस्त्र एव इति कथ्यते। ताः तु आन्वीक्षिकी, त्रयी, वार्ता दण्डनीतिः च। कौटिल्यस्तु एताः एव विद्यारूपेण स्वीकृतः। ज्ञानाधारितसमाजाय मानवानां सुजीवनाय च एता एव पर्याप्ताः एव तेषां मतम्। एतासु एव सर्वे विषयाः अन्तर्भवन्ति।

आन्वीक्षिज्यां सांज्यं, योगः, लोकायतं चान्तर्भवन्ति। धर्मतत्वविचारः आन्वीक्षीज्या साध्यते। सुखदुःखादि विरुद्ध-द्वन्देषु आन्वीक्षिकी मनःस्थैर्यं प्रददाति। सज्पूर्णवैदिकवाङ्यमेव त्रयीशब्देन
अभिधीयते। यतो हि अथर्वणस्यापि तेषु अन्तर्भावं कौटिल्यमते वर्तते। एवञ्च साङ्गवेदं मिलित्वा दश, तैः साकं पुराणानि च संयुज्य एकादशविद्याः त्रयीसंज्ञायाम् अन्तर्भवन्ति।

कृषिवाणिज्यादि समस्तार्थानर्थचिन्ताप्रकारप्रपञ्चसारबोधिनी व्यवहारतत्वदर्शिनी वार्ता। समुचित सुस्थित जीवनाधारित समूहनिर्मिति हेतुभूतविद्या भवति दण्डनीतिः।

कौटिलीयग्रन्थेऽपि एतादृशविद्याप्रपञ्च प्रतिपादनदर्शनात् मौर्यसाम्राज्यकालेऽपि एतादृशशिक्षासम्प्रदायस्य, तद्वारा ज्ञानाधारित समाजस्य विकसनञ्च भारते राष्ट्रसंस्कृतिवर्धनपुरःसरं उल्लसति स्म। एतद्विद्याप्रपञ्च प्रसारितसंस्कृतिसारभूतमेव भारतीयनित्य नैमिनैमित्तिकजीवन पद्धतिरिति तज्ज्ञैः अवगन्तुं शक्यते।

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 18th , Vol – V,. Page-90-93 ISSN 976-8645

देशराज्यराष्ट्रादिषु संस्कृत्यपचयहेतवस्तु काले काले सञ्भवत्येव। वैदेशिक राष्ट्रनीतिसङ्कलनमपि तत्कारणमिति यद्यप्युक्तं तथापि स्वदेशराष्ट्रादिजन्यहेतवोऽपि संस्कृतिच्युतिकारणभूतेन न केवलं भारते अपि सर्वत्रापि वर्तत इति सामूहिकजीवनविज्ञानशाखाकोविदैः नितरां सिद्धान्तीक्रियते। उपर्युक्तविषयद्वारा ज्ञानाधारित समाजनिर्माणे भारतीयशिक्षायाः योगदानं चतुर्दशविद्यानां वर्ततेइत्यत्र नास्ति सन्देहः।